E-ISSN-2584-2870 DOI: https://doi.org/10.65833/dbs.2026.018

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# न्यायनये कारणत्वपदार्थविमर्शः

**न्यायाचार्यः अनुकूलढकालः,**
तुलनात्मकधर्मदर्शनविभागः, सम्पूर्णानन्द सं. वि.वि., वाराणसी
a.dhakal2025@gmai.com
**डॉ. जनार्दन सुवेदी**
सहायकाचार्य (संविदा)
केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीरघुनाथकीर्तिपरिसरःदेवप्रयागः
Subedijanardan93@gmail.com

## शोधसारः (Abstract)

शास्त्रमर्मज्ञा न केवलं स्वशास्त्राभिमतसिद्धान्ताभिमानिनोऽपितु तदनुकूलप्रमाणानुसन्धानजलधिनिमग्नास्तैस्तैः प्रमाणैस्स्वशास्त्रनिबद्धपदार्थे प्रामाण्यसाधनतत्परा भवन्ति। विशेषत आस्तिकदार्शनिकपरम्परायां पूर्वोक्तः क्रमो दरीदृश्यते। तस्मादेव कारणाद्दार्शनिकाः प्रबलप्रमाणसाहाय्येन परमतनिराकरणपूर्वकं स्वमतं स्थापयन्ति । तत्रापि न्यायदर्शनाभिमतप्रमाणैरर्थपरीक्षणप्रक्रियाविशेषेणानुशील्यते । सदसद्विवेकोऽपि तथैव कार्योपादानकारणत्वस्य । प्रबन्धेऽस्मिन् 'नानुपलब्धे न निर्णीतार्थे न्यायः प्रवर्तते किं तर्हि संशयितार्थे' इति न्यायभाष्यानुशासनाद्, अयं शोधः कार्यं प्रागेव कारणे सद् असद् वा? इत्यस्मिन्, विशेषतः कार्यं कार्योपादानकारणे सन्न वा? इत्याकारकसंशये प्रवर्तते । एवं च 'विमृश्य पक्षप्रतिपक्षाभ्याम् अर्थावधारणं निर्णय' इति न्यायसूत्रोपदेशानुशिष्टात् सदसत्पदार्थयोः पक्षं विपक्षं चावलम्ब्य तत्तच्छास्त्राभिमतानुकूलसाधकबाधकोभयहेतुं प्रमाणैर्विमृश्य प्रमाणसहकृततर्केण कार्यं कारणे प्रागेव न सदिति प्रतिपाद्यते । तद्विरुद्धत्वेन प्रतिभासमानस्य कार्यं प्रागेवोपादानकारणे सदितीत्याकारकसत्त्वाभासस्याभासो निराक्रियते।

नैयायिकाः प्रमाणानुरोधेनासत्कार्यवादिनः, केचन सत्कार्यवादिनः अनेनैको विशिष्टस्संशय उदेति यत्, कार्यमुत्पत्तेः प्रागेव कारणे सद् असद् वा? तत्संशयसमाधानार्थेयं प्रवृत्तिः। न्यायसूत्रे महर्षिगौतम ईश्वरोपादानताप्रकरणे ईश्वरस्य कारणत्वम् उपदिशति। तदनुरोधेनैव न्यायभाष्यकारस्तस्माद् ईश्वरः कारणमिति प्रोवाच । तथैव न्यायकुसुमाञ्जलिग्रन्थ आचार्य उदयनोऽलौकिकस्य परलोकस्यालौकिकसाधनमस्ति न वा ? इत्याकारकसंशयस्य निवृत्त्यै प्राथम्येन घटादिकार्ये कपालादिकारणजन्यत्वं साधयति कार्यस्य समवायिकारणे पूर्वविद्यमानत्वात् कादाचित्कत्वहेतुना। कादाचित्कत्वञ्च प्रागभावभिन्नत्वे सति यत्किञ्चित्कालबाधितत्वे सति यत्किञ्चित्कालाबाधितत्वम् । परन्तु ये सांख्या अद्वैतवेदान्तिनश्च ते कार्यस्य कारणवैचित्र्याभावत्वात् कार्यं कारणे प्रागेव सदित्यङ्गीकुर्वन्ति, यद्यपि शांकरभाष्याद्यद्वैतग्रन्थेषु ब्रह्मण उपादानत्वं केनचिद्रूपेण स्वीकृतमेव। तथापि कारणात् कार्यमभिन्नं नेति साधनमत्यावश्यकमसत्कार्यवादराद्धान्तस्य तन्मूलत्वात् । तदनुरोधेनैवास्मिञ्च्छोधप्रबन्धेऽसत्कार्यवादिनां मतं तच्छास्त्रानुसारेणैवोपस्थाप्य तस्यास्वीकार्यत्वे बीजं संस्थाप्य न्यायनये कारणत्वपदार्थं सर्वतोभावेन विविच्य न्यायदर्शनाभिमत–असत्कार्यवादपदार्थस्य सिद्धिः प्रमाणीक्रियते।

**प्रयुक्ताः पारिभाषिकशब्दाः–**

सत्कार्यवादः, असत्कार्यवादः, कार्यत्वम्, कारणत्वम्, कादाचित्कत्वम्।

**पूर्वकार्यसमीक्षणम्**

वैदिकदर्शनपरम्परायां न्यायदर्शनस्य विशिष्टतमं स्थानं वर्तते। प्रमाणैः प्रमानुसन्धानविधेर्वैशिष्ट्यं तत्र मूलं कारणम्। तद्विधिमनुसृत्यैवाचार्यैरसत्कार्यपदार्थविषयेऽनुशीलनं व्यधायि। यद्यपि न्यायदर्शनाभिमतमसत्कार्यवादम्, सांख्याद्वैतोभयाभिमतं सत्कार्यवादमतम्, तत्तच्छास्त्रेषु निबद्धमेव प्राप्यते। तथापि सदसत्कार्यवादमतमाश्रित्यैकत्र सम्यक्तया विवेचनमपेक्षानुरूपं स्वपक्षस्थापनं च न दृश्यते। प्रतिपादितस्यास्यानुशील्यमानविषयस्य प्रतिपादकभूतानां शास्त्राणां कालक्रमानुसारेणात्र विवरणमत्र प्रदास्यते। श्रीगदाधरभट्टाचार्यविपश्चिता वादवारिधिग्रन्थे (ख्रै. १९३६) कारणतावादवीचौ कारणस्य कारणभेदनिर्द्दिष्टादसत्कार्यत्वं फलतो लभ्यते। परञ्च स्पष्टावधारणं तत्र सत्कार्यवादस्य नैवोपलभ्यते।

पण्डितश्रीबदरीनाथशुक्लमहोदयेन आरम्भवादग्रन्थे (वै. २००८) असत्कार्यव्यवस्थापनप्रकरणे किञ्चिद् असत्कार्यवादविषये विवेचितम्। परन्तु तन्न पर्याप्तं संशयावकाशात्।

श्रीएन्. आर्. कृष्णताताचार्यमहोदयेन सं.सं.वि.विद्यालयस्य त्रैमासिकीपत्रिकायां श्रीशंकराचार्यद्वादशजन्मशताब्दिविशेषाङ्के (वै. २०४८ तमे) सत्कार्यवादसमीक्षा इत्यस्मिञ्छोधलेखे सत्कार्यवादविषये समीक्षणं विहितम्। परन्तु तेन समीक्षणेन बहवो दोषा नापहृताः।

आचार्योदयनप्रणीतन्यायकुसुमाञ्जलिग्रन्थे (वै. २०७२) असत्कार्यवादस्यातिसूक्ष्मदृष्ट्या निरूपणं विहितं वर्तते। परन्तु तस्य क्लिष्टत्वान्न सर्वानुभवगम्यः।

आचार्यवाचस्पतिमिश्रेण सांख्यतत्त्वकौमुद्यां (वै. २०७३) सत्कार्यवादसिद्ध्यर्थं बहवो हेतवो विवेचिताः। किन्तु तत्र सत्कार्यवादपदार्थस्थापनचेष्टा विहितमित्यनुगम्यते तन्न सफला प्रवृत्तिः।

आचार्यशंकरप्रणीतब्रह्मसूत्रभाष्यस्य (ख्रै. २०२१) आरम्भाधिकरणभाष्ये सत्कार्यवादस्य प्रतिपादनं लभ्यते। परन्तु तेन कार्यं कारणे सदिति सर्वदैव न सिद्ध्येत्।

एतावता अनेकैर्विपश्चिद्भिः स्वशास्त्रसिद्धान्तानुरूपस्य सत्कार्यवादस्य असत्कार्यवादस्य च विषये बहुचर्चितम्। तैः सर्वैरपि स्वस्वमतं संस्थापितमिति प्रतिभाति। तेषु केषाञ्चन विदुषां दिग्दर्शनरूपेणैवोल्लेखनं विहितम्। तेष्वाचार्याणां मतं वैदुष्यपूर्णमित्यत्र न काचन विप्रतिपत्तिः। तथाप्युपर्युक्तानां मतानां चिन्तनानाञ्च दोषारूढत्वात्तस्य नवीनरूपेणानुसन्धानमूलकं विवेचनं विधाय दोषाभावविशिष्टनिर्णयो दातव्यो भवति। तत्र तत्र शास्त्रेषु यद्यप्यनुसन्धानपूर्वकविश्लेषणन्तु विहितम्। परञ्च तन्न पर्याप्तमिति धिया प्रस्तुतेस्मिञ्च्छोधलेखे समागतानां प्रश्नानां न्यायदर्शनदृष्ट्यातिसूक्ष्मदोषाणाञ्च समाधिः प्रदीयते। येन सदसदुभयवादजिज्ञासवस्तृप्यन्ताम्। तदर्थोऽयं लघुशोधप्रबन्धः प्रवर्तते। अनेनैवास्य प्रबन्धस्यौचित्यमावश्यकत्वञ्च पुष्यति।

**अध्ययनस्य सीमाङ्कनम्**

सत्कार्यवादपदार्थखण्डनपुरस्सरन्न्यायदर्शनाभिमतासत्कार्यवादपदार्थनिरूपणमेवास्याऽऽलेखस्यावधिः।

**शोधविधिः**

प्रस्तुतमिमं लघुप्रबन्धं सम्पादयितुमत्र सामग्रीसङ्कलनविधिरध्ययनविश्लेषणविधिश्चेति शोधविधिर्द्विधा विभक्तः । प्रसङ्गेऽत्रादावावश्यकसामग्रीसङ्कलनं कथं विहितमिति निर्दिश्यते चेत्तदनु सङ्कलितसामग्रीरादाय कतमञ्च विधिमवलम्ब्याऽऽलेखोऽयं सम्पादित इति स्पष्टीक्रियते । तत्र सम्पादितस्य लघुप्रबन्धस्य कृत आवश्यकसामग्रीणां सङ्कलनार्थं भूरिशः पुस्तकालयाः प्रयुक्ताः । तत्र पुस्तकालयेषु प्राप्ता ग्रन्था एव प्रमुखसामग्रीत्वेन गृहीता इति । अथ च यथावश्यकं न्यायदर्शनविचक्षणैः सह संवादादिकमपि विधाय सामग्रीसङ्कलनं कृतमस्ति । एवमेव प्रस्तुते लघुनिबन्धे मूलतः समीक्षणात्मको विधिरवलम्बितो वर्तते । अस्मिँश्च निबन्धे शास्त्रनिर्दिष्टान् सिद्धान्ताँश्चाऽऽदाय तेषां विषयाणां विश्लेष्यत्वान्निगमनात्मकविधिरवलम्बित इति सुतरां सिद्ध्यति । अभिधानेनाऽनेन लघुप्रबन्धेऽत्र गुणात्मकविधिरवलम्बित इत्यप्यधिकरणसिद्धान्तसिद्धम् ।

**सैद्धान्तिक आधारः**

न्यायशास्त्रस्यारम्भवादसिद्धान्त इति न्यायसूत्रभाष्यवार्तिकादिग्रन्थेषु सर्वसुलभतया प्राप्यते । तत्र कारणस्वरूपप्रतिपादनावसरे कार्यस्य कारणजन्यत्वात् घटादिकार्यं प्रागेव कपालादिकारणेऽसदिति स्थिरीक्रियते । तच्च, अनन्यथासिद्धनियतपूर्ववृत्तिजातीयत्वं कारणत्वमिति लक्षणसाहाय्येन । [1]तथैव नियतावधिकत्वहेतुनापि कारणस्य कार्यात् सर्वदैव भिन्नत्वमिति प्रमाणीक्रियते । अनेनासत्कार्यत्वपदार्थविवेचनं न्यायगर्भीभूतमिति पुष्यति ।

**समस्याकथनम्**

यद्यपि सामान्यतो न्यायनयेऽसत्कार्यवादविवेचनं बहुधा बहुभिर्विद्वद्भिः कृतम् । तथापि तद्बाधकसामग्र्युपस्थापकसत्कार्यवादपदार्थप्रतिपादकसिद्धान्तस्य यथास्वरूपमुपस्थाप्यासत्कार्यवादविवेचनं तथा न विहितम्, येन प्रतिबन्धकीभूतस्य पदार्थस्यैवाप्रतिबन्धकत्वं स्यात् । बाधकस्याबाधितत्वसम्पादनात् । तथा व्याख्यानादर्शनात् सैव समस्या दृष्टिपथानुगता भवति–

क) सत्कार्यवादपदार्थः कः?

ख) न्यायनयेऽसत्कार्यवादपदार्थः कः?

ग) सत्कार्यवादस्वीकरणे का हानिः?

घ) असत्कार्यवादसाधकहेतवः के?

**उद्देश्यकथनम्**

पूर्वपक्षानुरूपसिद्धान्तत्वेन स्थापितस्य सत्कार्यवादपदार्थस्य दोषत्वमुद्भाव्य न्यायदर्शनाभिमतासत्कार्यवादसिद्धान्तस्वीकरणमेवाप्रतिहता गतिरिति संस्थापनमेवास्योद्देश्यम् । तथा च मूलभूतोद्देश्यं यथा–

क) सत्कार्यवादपदार्थनिरूपणम् । ख) न्यायनयेऽसत्कार्यवादपदार्थनिरूपणम् ।

ग) सत्कार्यवादस्वीकरणे दोषबाहुल्यम् । घ) स्वरूपनिर्धारणपूर्वकमसत्कार्यवादसाधकहेतूनां प्रदर्शनेन शोधनिष्कर्षणम् ।

**विषयारम्भः**

---

[1] स्वाव्यवहितपूर्वक्षणावच्छिन्नस्वसमानाधिकरणवृत्तित्वसम्बन्धेन कार्यविशिष्टो योऽभावः तदीयसामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदक–यद्धर्मावच्छेदेन यादृशकार्यं प्रति न कारणत्वव्यवहारः प्रामाणिकानां तद्रूपावच्छिन्नभिन्नजातीयत्वं कारणत्वम् ।

तार्किकैः कारणत्वस्य विशदविवेचनमतिसूक्ष्मदृष्ट्या स्वकीयग्रन्थेषु निरूपितमेव वर्तते। एतेषां मते कार्यस्य कारणस्य च सर्वदैव भिन्नत्वाद् अपि च द्व्यणुकादिब्रह्माण्डान्तं सर्वमेव कार्यजातं स्वोत्पत्तेः प्राक् सर्वथैवाविद्यमानत्वात् स्वकारणवर्गेण ब्रह्माण्डान्तं समुत्पाद्यत इति स्वीक्रियते। अयमेव न्यायदर्शनाभिमतः असत्कार्यवाद इत्युपचर्यते।

**शोधेऽस्मिन् प्राथम्येन प्रस्तूयतेऽद्वैतवादिनां मतम् , अद्वैतवेदान्तिनां सम्मतः सत्कार्यवादः**

आचार्यः शंकरः ब्रह्मसूत्रस्य प्रथमपाद आरम्भाधिकरणभाष्ये, [2]तदन्यत्वम् आरम्भणशब्दादिभ्यः , [3]भावे चोपलब्धेः , [4]सत्त्वाच्चावरस्य , [5]असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् , [6]युक्तेः शब्दान्तराच्च , [7]पटवच्च , [8]यथा च प्राणादि इति सप्तभिः सूत्रैः सत्त्वस्य कार्यनिष्ठधर्मत्वं स्तौति। तेषाम् आरम्भाधिकरणस्थानां सूत्राणां भाष्यानुसारेणाशयस्तु कारणभिन्नस्य सर्वस्यैव वस्तुजातस्य मिथ्यात्वाद्, असतः कार्यस्योत्पत्तेरसम्भवेन कारणाद् अभिन्नमेव कार्यं भवति व्यावहारिकम्। न तु परमार्थत इति, कार्यकारणयोरेकत्वेन सत्कार्यत्वमिति अद्वैतमताभिमानिनाम्।

आरम्भाधिकरणभाष्ये निगमनवाक्यत्वेन निगमयति शंकरः– यथा च लोके प्राणापानादिषु प्राणभेदेषु प्राणायामेन निरुद्धेषु कारणमात्रेण रूपेण वर्तमानेषु जीवनमात्रं कार्यं निर्वर्त्यते, नाकुञ्चनप्रसारणादिकं कार्यान्तरम्। तेष्वेव प्राणभेदेषु पुनः प्रवृत्तेषु जीवनादधिकमाकुञ्चनप्रसारणादिकमपि कार्यान्तरं निर्वर्त्यते, न च प्राणभेदानां प्रभेदवतः प्राणादन्यत्वं, समीरणस्वभावाविशेषात्। एवं कार्यस्य कारणादन्यत्वम्। अतश्च कृत्स्नस्य जगतो ब्रह्मकार्यत्वात्तदनन्यत्वाच्च सिद्धैषा श्रौती प्रतिज्ञा 'येना–श्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' (छा० ६।१।३), इति। अनेन निगमनवाक्येन स्पष्टीभवति यत्, कार्यं सदिति, अयं सत्कार्यवादो विवर्तवादपदार्थपरः। अस्य च विवर्तवादस्य शारीरकभाष्यानुसारेण श्रुत्यर्थानुरूपत्वात् सत्कार्यवादस्य प्रामाणिकत्वम् अभ्युपगन्तव्यम् इत्येवाभिप्रेतोऽर्थो मायावादिनाम्।

तथैव, अद्वैतनये जगदुपादानत्वं ब्रह्मणि, मायावशादिति पारम्परिकाद्वैतसैद्धान्तिकग्रन्थेषूपलभ्यते। इदमेव तत्त्वं तद्भिन्नपक्षाभिमतशास्त्रेषु पूर्वपक्षित्वेनोपस्थापितमपि पूर्वपक्षग्रन्थानुगमनेनानुभूयते। तादृशचिन्तनानामनुरोधेन, तमेव चिन्तनमादृत्य सत्कार्यवादमतं तेषामिति स्पष्टीभवति।

अपि च वैयासकिन्यायमालायाम्–

भेदाभेदौ तात्त्विकौ स्तो यदि वा व्यावहारिकौ।
समुद्रादाविव तयोर्बाधाभावेन तात्त्विकौ॥
बाधितौ श्रुतियुक्तिभ्यां तावेतौ व्यावहारिकौ।
कार्यस्य कारणाभेदादद्वैतं ब्रह्म तात्त्विकम्॥

**सांख्यनये सत्कार्यवादः–**

---

[2] ब्रह्मसूत्रम् २।१।१४।
[3] ब्रह्मसूत्रम् २।१।१५।
[4] ब्रह्मसूत्रम् २।१।१६।
[5] ब्रह्मसूत्रम् २।१।१७।
[6] ब्रह्मसूत्रम् २।१।१८।
[7] ब्रह्मसूत्रम् २।१।१९।
[8] ब्रह्मसूत्रम् २।१।२०।

आचार्येणेश्वरकृष्णेन सांख्यकारिकायां पञ्चभिर्हेतुभिः कार्ये सत्त्वं न्यरूपि । ते च हेतवो यथा असदकरणात्, उपादानग्रहणात्, सर्वसम्भवाभावात्, शक्तस्य शक्यकरणात्, कारणभावाच्चेति । तत्प्रतिपादिका कारिका च यथा–

**[9]असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।**

**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ।।**

अस्याः कारिकाया आशयस्तु तत्त्वकौमुद्यां प्रकटयति वाचस्पतिमिश्रः । तेषामभिमतम् आश्रित्यैव सत्कार्यवादप्रतिपादिकायाः कारिकायाः सारो वर्ण्यते, विविच्यते च । प्रथमं तावत् कार्यं सद् असदकरणाद् इति । असदकरणत्वं तु कार्योत्पत्तेः प्रागेव कार्यस्य कारणे विद्यमानत्वम् । तत्साध्यसाधकव्याप्तिस्तु यथा, यद् असद् तद् अकरणकम्, यथा शशशृङ्गम्, यच्च करणकं तत् सद् यथा घटः । अनेन व्याप्त्यनुग्रहेण कार्यस्वरूपपक्षे सत्त्वस्वरूपसाध्यमनुमीयते । परं तु तदनुमानम् अयुक्तम् । यदि, उत्पत्तेः प्रागेव कार्यं स्यात् तर्हि घटः सन्, घटः असन्, इत्यादिव्यवहारोऽप्यसन् । अनेनासदकरणत्वहेतुना कार्यसत्त्वं पक्षधर्मत्वाभावाद् न सिद्ध्यति । किन्तु, [10]नासदुत्पादो न शृङ्गवद् इति सांख्यसूत्रबलाद् असतो वस्तुन उत्पत्तेरभावात् सदेव कार्यम् इति । तत्प्रोक्तं मिश्रेणापि न हि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं शक्यत इति ।

द्वितीयं तावत्, कार्यं सद् उपादानग्रहणाद् इति । अनुमानाशयस्तु, कार्यम् उपादाने सत् सहसम्बन्धत्वात्, यद् यस्मिन्नुपादाने न सद्, न तत् तेन सम्बद्धम्, यथा मृत्तिकया पटादिकम् इति । अनेनोपादानग्रहणहेतुना सिद्ध्यति यद्, यदि कारणव्यापारात् प्रागेव कार्यं न स्यात्, तर्हि मृत्तिकया पटोत्पत्तिः, तन्तुभिर्घटोत्पत्तिश्च स्यात् । तथा न दर्शनान्मृत्तिकायामेव घटकार्योत्पादनसामर्थ्यदर्शनात् कार्यस्य सत्त्वं न च्यवते । उक्तं च सांख्यवृद्धैः–

**[11]असत्त्वे नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः ।**

**असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः ।। इति ।**

तृतीयानुमानन्तु, कार्यं सत् सर्वसम्भवाभावाद् इति । अस्यार्थस्तु, कार्यं कारणेन सम्बद्धकारणे नियमेनाभिव्यञ्जमानत्वात्, सर्वं कार्यजातं न सर्वस्मादेव कारणादिति । अभिप्रेतोऽर्थस्तु भिन्नभिन्नं कार्यं प्रति भिन्नभिन्नवस्तुनः कार्यो ेत्पादकत्वदर्शनात्, कार्योत्पादनसामग्रीवैचित्र्यात् कारणं सदिति । अन्यथा दुग्धात् तैलोत्पत्तिः, तिलाच्च दध्योत्पत्तिः स्यात् । तथा न दर्शनात्, सर्वसम्भवाभावाद् इत्यनेन हेतुना कार्ये सत्त्वं स्थाप्यते ।

चतुर्थस्तु यथा, कार्यं सत् शक्तस्य शक्यकरणाद् इति । तदाशयस्तु, इह कुलालः शक्तो मृद्दण्डचक्रचीवररज्जूनिरादिकरणोपकरणं वा शक्यमेव घटं मृत्पिण्डाद् उत्पादयति । फलितार्थस्तु, कार्यवैचित्र्यं प्रति कारणगतशक्तेः कारणत्वम्, कारणगतशक्तौ भेदः, अतः शक्यरूपकार्येऽपि भेदः । अनेन कार्यस्योत्पत्तेः प्रागेव कारणे सत्त्वमिति व्यवस्थापितम् ।

पञ्चमो यथा, कारणभावात् कार्यं सद् इति । कारणस्य यल्लक्षणं तदेव लक्षणं कार्यस्यापि, न हि कार्यं कारणाद् भिन्नं कार्यस्य कारणस्वरूपत्वाद्, एतस्मात् सत्त्वं कारणस्य । दृष्टान्तस्तु यथा, यवेभ्यो यवाः, व्रीहिभ्यो व्रीहय एवोत्पद्यन्ते । न हि व्रीहिभ्यो यवाः, न हि यवेभ्यो व्रीहयः । यदि कार्यमसत् स्यात्, तदा कोद्रवेभ्यः शालयः स्युः । तथा न दर्शनात् कार्यं सत् ।

---

[9] सांख्यकारिका ।।९ ।।

[10] सांख्यसूत्रम् ।

[11] सांख्यतत्त्वकौमुदी, कारिका ९ व्याख्यायाम् ।

उपपादितैः पञ्चभिर्हेतुभिः प्रधाने महदादिलिङ्गमस्तीति सिद्ध्यति । तस्मात् सत उत्पत्तिर्न त्वसतः । इदमेव सत्त्वं तत्त्वं सांख्यानाम्।

यद्यपि, अद्वैतिनः सांख्याश्च सत्कार्यवादिनस्तथापि तयोः सत्कार्यवादयोः भेदः क्वचित् प्रसिद्धः । अत एवोक्तम्–

**[12]विवर्तवादस्य च पूर्वभूमिर्वेदान्तवादे परिणामवादः ।**

**व्यवस्थितेऽस्मिन्परिणामवादे स्वयं समायाति विवर्तवादः ।।**

**अधुना न्यायनयाभिमतासत्कार्यवादस्य तत्त्वं प्रकटीक्रियते–**

सर्वविदितं, सुप्रसिद्धम् एव न्यायदर्शनस्य असत्कार्यवादत्वरूपसिद्धान्तः । कार्योत्पत्तेः प्राक् सर्वदैव कार्यस्य कारणेऽभावात् कार्यस्य कारणेऽसत्त्वमिति । अयमेवासत्कार्यवादपदार्थः । कार्यकारणयोरभेदत्वास्वीकरणात् कारणादभिन्नं न कार्यम् इति प्राथम्येन साधनीयम्भवति । यावन्न कारणलक्षणज्ञानं, न तावद् कार्यस्य । अतः कारणलक्षणं प्रतिपाद्यते ।

न्यायकुसुमाञ्जला आचार्योदयनोऽदृष्टाधिष्ठातृत्वपदार्थस्य निरूपणं प्रददाति । तत्रादृष्टत्वं नामालौकिकस्य परलोकस्य यदलौकिकसाधनं तदेवेति । किन्तु तत्र साधनमेवासिद्धम् । विशिष्टबुद्धौ विशेषणज्ञानस्य नियामकत्वाद् यावन्न साधनस्य प्रामाण्यं तावन्नालौकिकसाधनस्यापि प्रामाण्यम् । तदर्थं प्रोवाचोदयनः किं साधनम् । साधनसाध्यानुमानं तु घटादिकार्यं कपालादिकारणजन्यं कादाचित्कत्वाद् इति ।

प्रसङ्गेऽस्मिन् पूर्वपक्षिणः प्रकृतानुमाने सत्प्रतिपक्षमारोपयन्ति, आरोपसाधकानुमानन्तु– घटादिकार्यं न कारणजन्यम् आकस्मिकत्वाद् इति । सत्प्रतिपक्षदोषवारणन्तु यथा–

**[13]हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च ।**

**स्वभाववर्णना नैवमवधेर्नियतत्त्वतः ।।**

यदि कार्यम् आकस्मिकम् इति स्वीकुर्मस्तदा कार्यस्य हेतुनिषेधविधिरथवा कार्यस्य भूतिनिषेधविधिः । हेतुनिषेधविधिर्नाम कार्यम् अहेतुकमिति । तस्य कार्यस्याहेतुकत्वे बीजं तु– घटादिकार्याणां यज्जनकं तन्नित्यमनित्यं वा ? यदि साधनं नित्यं तदा नित्यत्वविशिष्टसाधनजन्यकार्यस्यापि नित्यत्वं स्यात् । परं तु घटादिकार्याणाम् अनित्यत्वस्वीकरणात् तत्कारणीभूतपदार्थस्यापि अनित्यत्वम् । यदा साधनमनित्यं तदा तस्योत्पत्तिर्दुर्वारैव । अतस्तस्य साधनस्य कार्यत्वमपि दुर्वारः । अनयैव रीत्या सर्वेषामेव कारणानाम् अनित्यत्वम्, अनित्यत्वाद् उत्पत्तिः, उत्पन्नत्वाच्च कार्यत्वम् इति धिया कार्यकारणप्रवाहस्य अनादित्वम्, अनादित्वाच्च अनवस्थादोषः । अनवस्था यदा प्रवाहरूपा तदा तन्न दोषार्हः । प्रवाहरूपस्य अनवस्थायाः इष्टत्वात्, तत्र प्रमाणं तु– जन्ममरणप्रवाहरूपानादित्वस्य न्यायसम्मतत्वात् । अत एवोक्तम् आचार्यैः– प्रवाहो नादिमान् एषः इति ।

नैयायिकैर्व्यक्तिपक्षे एवानवस्थाया दोषत्वम् परिशीलयन्ति । एतस्मादेव कारणाद् अयं घटः एतत्कपालजन्यः कादाचित्कत्वाद् इति रीत्या व्यक्तिघटे कादाचित्कत्वं न्यायसम्मतम् । अतो न दोषः ।

यदि हेतुनिषेधस्तदा भवनस्यानपेक्षत्वेन सर्वदैव कार्योत्पत्तिः स्यात् । कारणं विनैव कार्योत्पत्तेः स्वीकरणात् । यदि भूतिनिषेधः ब्रूमस्तदा प्राक्काले यथा न कार्यं तथैव पश्चात्कालेपि कार्यस्याभवनम्, भवनस्य निषेधात् ।

[12] ब्रह्मसूत्रशांकरभाष्यम्, आरम्भादिकरणे ब्रह्मतत्त्वविमर्शिणी–हिन्दीव्याख्यायाम् ।

[13] न्यायकुसुमाञ्जलिः, प्रथमस्तबकः ५ कारिका ।।

यदि कार्यं स्वजन्यमिति स्वीकुर्मः, तदा येन यज्जन्यते तस्य पूर्ववृत्तित्वमावश्यकम् कारणस्य कार्यपूर्ववृत्तित्वनियमात् । किन्तु, स्वस्यैवोत्पत्तिविरहाद् उत्पत्तेः पूर्वं स्वयम् असतः कथं स्वोत्पत्तौ जनकम्? पौर्वापर्यविरहाद् वा?

अनुपाख्यविधिरपि न, कार्यम् अलीकजन्यम् इत्युच्यमाने अविद्यमानस्य पदार्थस्य कारणत्वाभ्युपगमाद् यः स्वयमेवाप्रसिद्धस्तमात् कार्योत्पत्तिः स्वीकरणे बीजाभावः, कार्यस्य अवधिनियतत्वात् ।

[14]स्वभावो वर्णना नैवम् इत्याशयस्तु– कार्यं स्वभावजन्यम् , यथाकाशादीनां शब्दाश्रयत्वं स्वभावो न तु सर्वस्य, तथा घटादीनामेव कादाचित्कत्वं स्वभावः न त्वाकाशादीनाम् अपीति रीत्या कार्यस्य स्वभावजन्यत्वम् उपपन्नम् । तन्नोचितं यदि कार्यं स्वभावादेवयं स्यात्तर्हि कार्यस्य नियतावधिकत्वं न स्यात् । स्वभावे नियतावधिकत्वनियामकत्वाभावात् ।

पूर्वपक्षिणां मताभासस्तु यथा– कार्यम् आकस्मिकमिति । परन्तु नियतावधिकत्वहेतुना कार्य आकस्मिकत्वाभावः सिद्ध्यति । कार्यं कादाचित्कं नियतावधिकत्वाद्, अनेनानुमानेन कार्ये आकस्मिकत्वसिद्ध्यर्थं प्रवृत्तस्य कार्यम् आकस्मिकम् इत्यनुमानस्य सत्प्रतिपक्षत्वम् । सत्प्रतिपक्षदोषयुक्तत्वात् कार्यं कादाचित्कम् इत्यनुमाने न काचिद् विप्रतिपत्तिः । अनेन कार्यस्य कारणजन्यत्वं सिद्धम्।

अधुना कारणस्वरूपं विविच्यते । अनन्यथासिद्धनियतपूर्ववृत्तिजातीयत्वं कारणत्वमिति । अनन्यथासिद्धत्वञ्चान्यथासिद्धिशून्यत्वम्, अन्यथासिद्धस्य विभिन्नानि लक्षणानि सुप्रसिद्धानि सन्ति । यानि लक्षणानि न्यायपरम्परायां विशेषतो वर्णितानि स्वीकृतानि च सन्ति । विशेषतः कारणतावादवीचौ ये समुपलब्धानि तेषां लक्षणानां प्रदर्शनं व्रmमेण विधीयते । तच्च यथा–

१) येन रूपेण यादृशकार्यं प्रति पूर्ववृत्तित्वमवगम्यते तादृशकार्यं प्रति तद्रूपमन्यथासिद्धम् । यथा घटादिकं प्रति दण्डत्वादिकमन्यथासिद्धम् । प्रकृतलक्षणे दण्डत्वेन रूपेण घटादिकार्यं प्रति पूर्ववृत्तित्वं दण्डत्वस्यावगम्यते, तादृशघटकार्यं प्रति दण्डत्वमन्यथासिद्धम् ।

२) कारणन्तरेण सह यद्रूपावच्छिन्नस्य यादृशकार्यं प्रति पूर्ववृत्तित्वमवगम्यते, तद्रूपावच्छिन्नं तादृशकार्यं प्रत्यन्थासिद्धम्, यथा घटादिकं प्रति दण्डरूपत्वाद्यवच्छिन्नम्, दण्डसमवहितचक्रत्वाद्यवच्छिन्नं च ।

३) अवश्यक्लृप्तपूर्ववर्तिनैव कार्यसम्भवे तत्सहभूतं यद्धर्मावच्छिन्नं तद्धर्मावच्छिन्नमपि तत्रान्यथासिद्धम्, यथा पाकजगन्धादौ रूपादिप्रागभावः ।

४) प्रकृतकार्यं प्रति यद्धर्मव्याप्यधर्मस्यागुरोः कारणतावच्छेदकत्वसम्भवस्तदवच्छिन्नं च प्रकृतकार्येऽन्यथासिद्धम्, यथा घटादौ द्रव्यत्वाद्यवच्छिन्नम् ।

यद्यप्युपर्युक्तानामन्यथासिद्धस्वरूपाणां प्रतिपादनं बहुषु कारणलक्षणप्रकरणेषु दृश्यते । परन्तु तेषां लक्षणानां वस्तुतो नावश्यकता । कथमिति चेद् नियतपूर्ववर्तितावच्छेदकयद्धर्मावच्छेदेन यादृशकार्यं प्रति कारणत्वव्यवहारः प्रामाणिकानां तद्रूपावच्छिन्नमेव तादृशकार्येऽन्यथासिद्धमित्याकारकाप्रतिहतलक्षणस्वीकरणेन । अस्य लक्षणस्य समन्वयविधिर्यथा–

यद्यपि घटादिकार्यं प्रति दण्डस्य यथा पूर्ववृत्तिता तथैव दण्डत्वस्य, दण्डरूपत्वावच्छिन्नस्य, एवं पाकजगन्धादौ रूपादिप्रागभावस्य, एवं च घटादौ द्रव्यत्वाद्यवच्छिन्नस्य नियतपूर्ववर्तिता त्वस्ति तथापि तत्तत्कार्यं प्रति प्रामाणिकानां तेषु

[14] नित्यसत्त्वा भवन्त्येके नित्यासत्त्वाश्च केचन ।
विचित्राः केचिदित्यत्र तत्स्वभावो नियामकः ॥
वह्निरुष्णो जलं शीतं समस्पर्शस्तथाऽनिलः ।
केनेदं रचितं तस्मात् स्वभावात्तद्व्यवस्थितिः ॥ ब्रह्मसूत्रशांकरभाष्यम्, आरम्भादिकरणे प्रारम्भे ब्रह्मतत्त्वविमर्शिणी–हिन्दीव्याख्यायाम् ।

नियतपूर्ववर्तिषु कारणत्वव्यवहारो न क्रियते । तस्माद्दण्डत्वत्वावच्छिन्नस्य दण्डरूपत्वावच्छिन्नस्य च घटादिकार्यं प्रति, रूपादिप्रागभावत्वावच्छिन्नस्य पाकजगन्धादिकं प्रति, एवं द्रव्यत्वाद्यवच्छिन्नताया घटादिकार्येऽन्यथासिद्धत्वं सेत्स्यति ।

लक्षणेस्मिन् नियतपूर्ववर्तितावच्छेदकत्वं च स्वाव्यवहितपूर्वक्षणावच्छिन्नस्वसमानाधिकरणवृत्तित्वसम्बन्धेन कार्यविशिष्टो योऽभावस्तदीयसामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वमिति ।

यथा घटादिकार्यं प्रति दण्डस्य नियतपूर्ववर्तितावच्छेदकत्वं विद्यते । तथैव पूर्वोक्तान्यथासिद्धत्वस्यापि सत्त्वाद् घटादिकं प्रति दण्डस्य कारणत्वं सिद्धम् । तथैव कपालस्यापि । परन्तु ये पूर्वपक्षिणस्सन्ति त उद्घोधयन्ति यत् कार्यस्य कारणजन्यत्वमस्तु, घटादिकार्यं प्रति कपालादेः कारणत्वमस्तु तेन घटादीनां कपालाभिव्यक्तिपदार्थत्वन्न निषिद्धम् । घटादेः कपालाभिव्यक्तिरूपत्वात् । अतः कारण एव कार्यं पूर्वतः सत् ।

तादृशसंशयानुरोधादिदानीं कार्यस्य लक्षणं प्रतिपाद्यते येन कार्यस्य कारणभिन्नत्वं सहजतया समुपसिद्धेत् । नियतावधिकत्वं कार्यत्वम् । नियतावधिकत्वसिद्धिस्तु कादाचित्कत्वाद् कार्यस्य । कार्यं हि यत्किञ्चित्कालनियतस्वभाववान् यत्किञ्चिद्देशनियमस्वभाववान् वा, यत्किञ्चित्काले यत्किञ्चिद्देशे वा कार्यस्योत्पत्तिदर्शनाद् । अत एव कार्यस्यावधित्वं प्रसिद्धम् । तस्मान्नियतावधिकत्वस्य त्रैविध्यं सुप्रसिद्धं पूर्वावधिकत्वोत्तरावधिकत्वोभयावधिकत्वभेदेन । तत्र पूर्वावधिकत्वं ध्वंसस्य स्वीक्रियत उत्पत्तिमत्वाद् विनाशशून्यत्वाच्च । उत्तरावधिकत्वं तु प्रागभावस्य स्वीक्रियते उत्पत्तेरभावान्नाशवत्वाच्च । उभयावधिकत्वन्तु ध्वंसप्रागभावभिन्नद्व्यणुकादिब्रह्माण्डान्तवस्तुजातस्य कार्यस्य स्वीक्रियते । यथा घटस्योभयावधिकत्वम् । कथमिति चेद् घटस्योत्पत्तेः प्राग् घटप्रागभावस्य तथैव घटोत्पादकयावत्सामग्र्यादेः पूर्वावधिकत्वादुत्पन्नस्य घटस्य घटोत्पादकसामग्र्युत्तरावधिकत्वम् । एवञ्च तदेवोत्पन्नस्य घटस्य ध्वंसाद् घटध्वंसस्य पूर्वावधिकत्वं तस्य घटस्य सिद्धम् । अनेन स्पष्टीभवति यदभावभिन्नसर्वस्यापि कार्यवस्तुन उभयावधिकत्वं सिद्धम् । कार्यस्य नियतावधिकत्वलक्षणस्वीकरणेनासत्कार्यवादपदार्थस्तु नैव सिद्धम् । तन्न सत्यं, कार्यस्य नियतावधिकत्वसाधनेनासत्कार्यवादस्य सिद्धिरपि स्तूयते ।

यदि घटादिकार्यं कारण एव लीनं स्यात्तस्योत्पत्तिर्नामाभिव्यक्तिरेव स्याद् । तर्हि बह्वीभिः सामग्रीभिः कार्योत्पादनस्य कावश्यकता । अपि च कार्यनाशानन्तरं कपालस्यापि नाशः स्याद् द्वयोरैक्यात् ।

भवतु नाम प्रमाणसहकृतेन तर्केण पूर्वपक्षिणां मते कार्यं कारणे लीनं, सैद्धान्तिकमत उपादानकारणाद् भिन्नं वा ? परञ्च नैव सम्भवति यथार्थानुभवापलापो यथार्थानुभवस्यैव प्रमात्वं सर्वस्वीकृतत्वात् । प्रमात्वं च प्रमाणजन्यज्ञानत्वम् । अत एव प्रोक्तमाचार्यरघुनाथशिरोमणिना व्यधिकरणप्रकरणान्ते– यदि पुनरानुभविको लोकानां स्वरसवाही घटत्वेन पटो नास्ति, इत्यादिरनुभवस्तदा तादृशाभावनिवारणं गीर्वाणगुरुणा अपि अशक्यमिति । गदाधरभट्टाचार्योऽपि प्रोवाच व्युत्पत्तिवादे– न हि कस्यचिद् ग्रन्थकृता विपरीतलेखनं युक्तिबलाद् वस्तुसिद्धौ बाधकमिति ।

तथैव, सर्वेषामेव कार्यवस्तुन्युत्पद्यते, विनश्यति, प्राक्काले नासीद्, इदानीमस्तीत्याकारकज्ञानानां प्रत्यक्षानुभवात्, सर्वजनसिद्धत्वाच्च, तादृशानुभवस्तु न केवलमसत्कार्यवादिनोऽपितु सत्कार्यवादिनोऽपि । यथा कुलालो मृत्तिकया घटं निर्मिमीते । तस्मात् प्रत्यक्षानुभवसिद्धत्वात् प्रामाण्यमसत्कार्यवादस्य ।

## शोधनिष्कर्षः

अत्रोच्यते, अनन्यथासिद्धकार्यनियतपूर्ववृत्तिजातीयत्वं कारणत्वम् इति । कार्यात्पूर्वावधिकत्वं तस्य साधितमेव । एकेनैव कारणेन न कार्योत्पत्तिः, प्रतिबन्धकाभावविशिष्टयावत्कार्यजननसामग्र्यादेरावश्यकत्वात् । सामग्र्यादेः कार्यपूर्वावधिकत्वनियमात् कार्योत्पत्तेः प्राक् कार्यस्य प्रागभावः सिद्धः । अविद्यमानस्य वस्तुनः प्रागभाव इति व्यवहारात्, कपाले घटप्रागभावस्य च सत्त्वाद्,

घटस्योपादानकारणे कपाल उत्पत्तेः प्राग् घटरूपकार्यस्याविद्यमानत्वात् । यतो हि, एककालावच्छेदेनैकस्मिन्नेवाधिकरणे कपाले घटप्रागभावस्य घटप्रागभावप्रतियोगिनोऽपि सत्त्वं, न शक्यते केनापि प्रमाणसहकृतेन तर्केण साधयितुम् । अनेनैव फलति, पुष्यति नैयायिकानामसत्कार्यवादः, तत्साधककारणत्ववादश्चेति ।

## सन्दर्भग्रन्थसूचिः


श्रीगौतममुनिः, न्यायसूत्रम्, (वै. १९९९) वात्स्यायनभाष्यसहिता, पद्मप्रसादशास्त्रि–हरिरामशुक्लाभ्यां परिशोधितम् । चौखम्बा संस्कृत सिरिज आफिस, वनारस सिटी ।

भट्टाचार्यः गदाधरः, बादवारिधिः (ख्रै. १९३३)। पं. बालकृष्ण मिश्रः (काशीविश्वविद्यालय–वेदान्तप्रवक्ता), पं. ढुण्ढिराजशास्त्री (नित्यानन्दवेदविद्यालय–प्रधानाध्यापकः), चौखम्बा संस्कृत सिरिज आफिस, वनारस सिटी ।

उदयनाचार्यः, न्यायकुसुमाञ्जलिः (वै. २००९) श्री हरिदास भट्टाचार्यकृत संस्कृतविवृत्या विभूषितः, हिन्दीव्याख्याकुसुमाञ्जलिपरिमलः आचार्यविश्वेश्वर–सिद्धान्तशिरोमणिकृतः, विद्या भवन संस्कृत ग्रन्थमाला, वृन्दावन, मथुरा ।

उदयनाचार्यः, न्यायकुसुमाञ्जलिः (वै. २०७२) भाषानुवादसहिता, सम्पादकः÷व्याख्याकारश्च पं. दुर्गाधर झा, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी ।

शङ्कराचार्यः, ब्रह्मसूत्र शाङ्करभाष्यम् (ख्रै. २०२१)। हिन्दीटीका– ब्रह्मतत्त्वविमर्शिनी— स्वामी हनुमानदास शतशास्त्री, चौखम्भा विद्याभवन, वाराणसी

वाचस्पतिमिश्रः,सांख्यतत्त्वकौमुदी (वै. २०७३) (हिन्दीटीका) तत्त्वप्रकाशिका— डॉ. गजानन शास्त्री मुसलगाँवकरकृता, चौखम्भा संस्कृत संस्थान, वाराणसी ।

भट्टाचार्यगदाधरः, व्युत्पत्तिवादः (ख्रै. २०१२) सुदर्शनाचार्यविरचित–आदर्शटीकासहितः, प्रो. हरेराम त्रिपाठिना सम्पादिता, राष्ट्रिय संस्कृत संस्थानम्, नवदेहली ।

आचार्यः गङ्गेशोपाध्यायः, तत्त्वचिन्तामणिः (ख्रै. १९९०) श्रीकामाख्यानाथतर्कवागीशेन परिशोधितः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली ।

तर्कालङ्कारः जगदीशः, व्यधिकरणम्, (वै. २०१५) स्वामिश्रीरामप्रपन्नाचार्यकृतदीपिकाटीकोपेतम्, चौखम्बा संस्कृतसिरिज आफिस, वाराणसी ।

ईश्वरकृष्णः, सांख्यकारिका, (ख्रै. १९९८) डा. राकेशशास्त्रिणा कृता चन्द्रिकाव्याख्यासहिता, संस्कृत ग्रन्थागार, दिल्ली ।